योगवासिष्ठः/प्रकरणम् ६ (निर्वाणप्रकरणस्य उत्तरार्धम्)/सर्गः १२२

द्वाविंशत्यधिकशततमः सर्गः १२२

श्रीवसिष्ठ उवाच ।

ततः प्रभाते प्रसभं पृथिव्याः

कृत्वा यथाशास्त्रमलं व्यवस्थाम् ।

आविष्टदेहा इव ते रसेन

निषेध्यमाना इव मन्त्रिमुख्यैः ।। १

निवार्य सर्वं परिवारमात्र-

माक्रन्दमानं वदनै रुदद्भिः ।

निरस्य चास्नेहतयाभिमान-

मात्सर्यलोभाभिभवैषणादि ।। २

दिगन्तमालोक्य समुद्रपारे

क्षणात्समायाम इति ब्रुवन्तः ।

स्वमन्त्रशक्त्योत्तमतां गतैस्तै-

रब्धिः पदैरेव तदा प्रविष्टः ।। ३

विपश्चितस्ते दिशि दिश्यनल्पै-

र्भृत्यैः समुद्रं प्रविशद्भिरेव ।

भृत्यैश्च कैश्चित्त्वनुगम्यमाना

ययुर्यथा वारिणि पद्भिरेव ।। ४

तरङ्गजालेषु पदानि कृत्वा

पृष्ठे स्थलस्येव जलस्य चान्तः ।

चत्वार एकैकतयैव युक्ता

भृशं वियुक्ता निजसेनया ते ।। ५

पदक्रमेणैव महार्णवान्त-

स्तावत्प्रविष्टा अवलोकितास्ते ।

तटस्थितैर्यावददृश्यभावं

शरन्नभोमेघलवा इवापुः ।। ६

तमध्वानमथोहुस्ते जलधौ पादचारिणः ।

वितताध्यवसायेन बद्धकक्षाहरा इव ।। ७

उन्नतावनतामद्रिसमारोहावरोहणैः ।

श्रियं वारितरङ्गाणां हरन्तो हरिमूर्तयः ।। ८

आवर्तेषु तृणानीव भ्रान्ता विगतसंभ्रमम् ।

चिरं चञ्चलमत्ताभ्रचन्द्रमण्डलशोभिषु ।। ९

मन्त्रविद्याबलौजोभिर्दुर्जयाः शस्त्रपाणयः ।

क्वचित्प्रमत्तैर्मकरैर्निगीर्णोद्गीर्णदेहकाः ।। १०

जलकल्लोलविश्रान्तवातोत्सारितमूर्तयः ।

नीतानीताः क्षणेनैव योजनानां शतं शतम् ।। ११

जलकल्लोलमातङ्गतुङ्गिताङ्गतया तया ।

दधाना निजराज्येभपृष्ठरोहस्थितिश्रियम् ।। १२

विस्तीर्णोर्मिघटापट्टपाटपट्टनपाटवैः ।

दर्शयन्तो जलाम्भोदनिष्क्रान्तिं मारुता इव ।। १३

तरत्तरलमातङ्गतरङ्गौघविघट्टिताः ।

अत्यजन्तो निजं धैर्यं वेलावरतटा इव ।। १४

महोर्मिमुक्तामाणिक्यमण्डलप्रतिबिम्बिताः ।

एकाकिनोऽपि परितः पौरुषेयवृता इव ।। १५

पाण्डुडिण्डीरपिण्डेषु कुर्वन्तो लाघवात्पदम् ।

श्वेतपद्मपरिक्रान्तराजहंसश्रियं दधुः ।। १६

घननिर्घातनिर्घोषभीषणार्णवघुंघुमात् ।

न भीता भूभृतस्तत्र वेलावलनजृम्भितात् ।। १७

अभ्रंलिहजलाद्रीन्द्रपातोत्पातविघट्टिताः ।

क्षणं पातालमाजग्मुः क्षणमर्कास्पदं ययुः ।। १८

अशङ्कितोत्पतद्वारिपूरपातपटावृताः ।

उत्पातपातनिपतद्वितानकवृता इव ।। १९

प्रक्रान्तास्तेम्बुराशौ सहचरमकराः शूरनक्रैः कुलीरै-

र्व्याप्तावर्ताविवृत्ताः सलिलतरुलतासीकरैरन्तरालैः

कुर्वन्तः कान्तियुक्तं वपुरिव कुसुमैर्भ्रान्तमाणिक्यमुक्तै-

र्व्यक्ताव्यक्तांशुजालैः प्रतिपदमितरैरभ्ररूपैरदभ्रैः ।। २०

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मी० दे० मो० नि० उ० अवि० वि० बलपरिभ्रंशो नाम द्वाविंशाधिकशततमः सर्गः ।। १२२ ।।